# काव्यशास्त्रे रसपदस्यानेकार्थत्वम्

**डॉ. मनीषा शर्मा**
सहायक आचार्या
जय नारायण व्यास विश्वविद्यालय, जोधपुर

भारतीय साहित्यशास्त्रे रसम्प्रदायोऽस्ति नितरां प्राचीन इति न तिरोहितं विपश्चिन्महाभागानाम्। कर्त्तव्या काव्येषु रसा बुधैः इत्युक्त्वा आचार्यभरतेन रचनायां रसः सैव काव्यमिति निगदितम्। अयं रसः क इत्यत्र तत्वविदो वदन्ति -

**चेतनाया विशिष्ठा परिणतिर्हि रसः।**

न स रसोऽनुभूतेः पृथक् कर्तुं शक्यो रसास्वादनार्थ सौन्दर्य बोधस्यापरिहार्यत्वात्। नाटकादिदर्शनात् काव्यस्य चाध्ययनात्। नाटकादिदर्शनात् काव्यस्य चाध्ययनात् श्रवणाद् वा रस आविर्भवति। तदा तत्र सौन्दर्य मानवः प्रेक्षते तस्य च स बोधं विदधाति तन्मानसे रसः सञ्चरितुभारमते। अध्यात्मवादिनो वदन्ति रसानुभूतेः सम्बन्ध आत्मना वा सहदयरसचेतनया सार्धमस्ति।

उपनिषद प्राचीनसंस्कृतसाहित्ये रसपदप्रयोगो विभिन्नेषु अर्थेषु दृश्यते वेद वेदाङ्ग ब्राह्मण आयुर्वेद रामायण महाभारतादिसाहित्ये रसपदप्रयोगे विभिन्नेषु अर्थेषु मनीषिभिः कृतः। कोषग्रन्थेषु रसपदस्य अर्थाः सन्ति।

आस्वादो जलं वीर्य शृङ्गारादिकाव्यरसाः विषं वः पारदो रागः गृहं धातुः तिक्तादयः षड्मोजनरसाः परमात्मा चेति।

**''रसः स्वादे जले वीर्ये श्रृङ्गरादौ विषे द्रवे।**
**शब्दे रागे गृहे द्यातौ तिक्तादी पारदेऽपि च।''1**

काव्येषु रसपदेन शृङ्गारादयो रसा अवबुध्यन्ते। आयुर्वेदसाहित्ये रसपदं मधुरादि भोजनरसान् विषं पारदादिधातून रसरूप शरीर धातुं द्रवत्वं च अभिव्यक्तं करोति। साररूपश्रच पदार्थाऽपि रसपदेनाऽभिधीयते। वैदिकसाहित्ये, विशेषतः परमात्माऽपि रसपदेन अभिव्यज्यते।

तैत्तिरीयोपनिषदि परब्रह्मरसपदेन व्यवहतं यतस्तवबध्वा जीव आनन्दमनुभवति।

**''रसो वै सः। रसं सेवायं लब्वाऽऽनन्दीभवति।''2**

शङ्कराचार्येण व्याख्यातम् यथा मधुरादिभिः लौकिकरसैः मनुष्या आनन्दमनुभवन्ति, तथैव परमात्मरूप रसमुपलभ्य योगिनोऽप्यानन्द लभन्ते। वैदिकसाहित्ये शृङ्गारादयः काव्यरसा अपि रसपदव्यवहृताः समुलभ्यन्ते। शृङ्गारहास्यादिरसपदवाच्यानां प्रयोगो वैदिकसाहित्ये विद्यते तानि च पदानि साहित्यिक मनोभावान् निर्दिशन्ति।

भरतस्तु स्वयं ब्रूते -

''नाट्यरचनायां सकला सामग्री ब्रह्मणा वेदेभ्यो गृहीता। विशेषेण रसान अथर्ववेदात् असी ग्रहीतवान्।

**ज्ग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च**
**यजुर्वेदादभिनयान् रसानाथर्वणादपि।।3**

रसपदस्य निर्वचनम् अधोलिखितरूपेण विधीयते -

1. रस्यते आस्वाद्यते इति रसः। ये पदार्था आस्वाद्यन्ते ते रसाः। एवधाऽऽस्वाद्यमानाः पदार्था यैः परमात्ममधुरवस्तुसोमगन्धमध्वादि पदार्थाः रसपदव्यवहार्याः वर्तन्ते।

2. रस्यतेऽनेनेति रसः। यैः पदार्थैरास्वादनं विधीयते ते रसाः कथ्यन्ते। अतः शब्द राग वीर्य शरीरादयो रसाः कथ्यन्ते।

3. रसति रसयत्ति वेति रसः। व्याप्यते व्याप्नोति तत्वं तद् रसपदवाच्यं भवति। अतः पारदो जलं शरीरगतरसधातुः द्रव्यदार्थाश्च रसपदेन व्यवह्रियन्ते।

4. रसनं रस आस्वादः। आस्वादरूपः पदार्थो रसपदवाच्यो भवति। अतः शृङ्गारादीनि तत्र्यानि आस्वादरूपत्वाद् रसपदवाच्यानि भवन्ति।

उपर्युक्तनिर्वचनेषु प्रथमं चतुर्थ वा निर्वचनं साहित्यिकरसानभिव्यनक्ति। साहित्यरसा आस्वाद्यमाना आस्वादरूपा चा भवन्ति। रससिद्धान्तं काव्यानाञ्च रसात्मकत्वं प्रतिपादयितुं सम्प्राप्तेन कृतवान्। वाल्मीकिरामायणं प्रायशः प्रमाणत्वेन उदाह्रियते। तमसातीरं स्नातुं वाल्मीकिनाऽवलोकितः। व्याधः कश्चित् काममोहितं पक्षिणं क्रौञ्चं शरविद्धं शोणितपरीताङ्गो असौ पक्षी भूमौ पपात। तस्य प्रिया क्रौञ्ची विलपन्ती

वियति बभ्राम। घटनामिमावलोक्य शोकद्रवीभूतस्य महर्षेः शोक एव काव्यरूपेण परिणतः।

**''मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।**
**यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।''4**

आनन्दवर्धनेन स एव भावः काव्यात्मरूपेण प्रतिपादितः।

**काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।**
**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः।5**

स्वयमपि तेन महर्षिणा वाल्मीकिना स्वकाव्ये प्रतिपादितम्।

शोकार्तस्य तस्य कवेः असौ श्लोक एव काव्यरूपेण परिणतो नान्यथा भवितुमर्हीते।

**शोकतिस्य प्रहन्तो मे श्लोको भवतु नान्यथा।6**

रसेनैतेन काव्यसृष्टिसम्भावना सञ्जाता। अथ च वाल्मीके इदं रामायणं काव्यं संस्कृतभाषायाः प्रथमम् आदिकाव्यमाभिधीयते। करुण रसप्रधानेऽप्यस्मिन् काव्ये शृङ्गार-हास्य वीर रोद्र वीभत्स अद्भुत भयानक शान्ताः सर्वेऽपि रसा अङ्गरूपेणाऽवतिष्ठन्ते। काव्यरसानामिदं स्वरूपमेव काव्यशास्त्राचार्यैः अखण्ड-स्वप्रकाशानन्दमय-चिन्मय वेद्यान्तरस्पर्शशून्यब्रह्मास्वादसहोदर लोकोन्तरचमत्कारप्राणरूपं व्याख्यातम्।

**सन्दर्भग्रन्थसूची -**

1. हेमकोषः
2. तैत्तिरीयोपनिषद् (2.7)
3. भरतनाट्यशास्त्रम् (1.17)
4. रामायणम् (1.2.15)
5. ध्वन्यालोक (1.4)
6. रामायणम् (1.2.40)